## ४१

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः। १-२ वायुः, ३ इन्द्रवायू, ४-६ मित्रावरुणौ, ७-९ अश्विनौ, । विराड्वाना, २१ त्रिष्टुप्

**वायो॒ ये ते॑ सह॒स्रिणो॒ रथा॑स॒स्तेभि॒रा ग॑हि। नि॒युत्वा॒न्सोम॑पीतये॥ २.०४१.०१**

वायो- वातेत्याधिभौतिके। प्राणेत्याध्यात्मिके। नियुत्वान्- नियोजिताश्वसम्पन्नः प्राणप्रणालीभूताश्वयुक्तः सन्। सोमपीतये- रसानुभूतये। ये। ते- तव। सहस्रिणः- प्रभूताः। रथासः- रथा लक्ष्यप्रापकगतिप्रतीकाः। तेभिः- तैः। आ गहि- आगच्छ ॥१॥

**नि॒युत्वा॑न्वाय॒वा ग॑ह्य॒यं शु॒क्रो अ॑यामि ते। गन्ता॑सि सुन्व॒तो गृ॒हम्॥ २.०४१.०२**

नियुत्वान्- प्राणप्रणालीभूताश्ववान् सन्। वायो- प्राण। आ गहि- आगच्छ। अयम्- एषः। शुक्रः- शुद्धो रसः। ते- त्वदर्थम्। अयामि- गृहीतः। सुन्वतः- रसनिष्पादकस्य। गृहम्- सद्म। गन्ता- याता। असि- भवसि ॥२॥

**शु॒क्रस्या॒द्य गवा॑शिर॒ इन्द्र॑वायू नि॒युत्व॑तः। आ या॑तं॒ पिब॑तं नरा॥ २.०४१.०३**

अद्य- इदानीम्। नरा- नेतारौ। इन्द्रवायू- इन्द्र ईशनाधिदेवता। वायुः प्राणाधिदेवता। नियुत्वतः- प्राणप्रणालीयुक्तस्य। गवाशिरः- चिद्रश्मिमिश्रितस्य। शुक्रस्य- शुद्धरसस्यानुभूतये। आ यातम्- आगच्छतम्। पिबतम्- अनुभवतम् ॥३॥

**अ॒यं वां॑ मित्रावरुणा सु॒तः सोम॑ ऋतावृधा। ममेदि॒ह श्रु॑तं॒ हव॑म्॥ २.०४१.०४**

मित्रावरुणा- मित्रः स्नेहाधिदेवता वरुणः प्रकृतिनियतिभूतसत्याधिदेवता। ऋतावृधा- प्रकृतिनियतिभूतसत्यवर्धकौ। वाम्- युष्मदर्थम्। अयम्- एषः। सोमः- रसः। सुतः- निष्पन्नः। इह- अत्र। मम- मे। हवम्- आह्वानम्। श्रुतम्- शृणुतम् ॥४॥

Dr. Rangaji

WEBOLIM

**राजानावनभिद्रुहा ध्रुवे सदस्युत्तमे। सहस्रस्थूण आसाते॥ २.०४१.०५**

राजानौ- स्वामिनौ रञ्जकौ। अनभिद्रुहा- अद्रोहौ। सहस्रस्थूणे- सहस्रस्तम्भमण्डपे। उत्तमे- श्रेष्ठे। सदसि। ध्रुवे- नित्ये। आसते- उपविशतः ॥५॥

**ता सम्राजा घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम्॥ २.०४१.०६**

ता- तौ। सम्राजा- राजानौ। घृतासुती- दीप्तभोगौ। आदित्या- अखण्डप्रकृतिजौ। दानुनस्पती- दानपालकौ। अनवह्वरम्- अकुटिलं भावनम्। सचेते- सङ्गच्छतः ॥६॥

**गोमदू षु नासत्याश्वावद्यातमश्विना। वर्ती रुद्रा नृपाय्यम्॥ २.०४१.०७**

नासत्यौ- सत्यस्वरूपौ। अश्विना- प्राणेशनशक्तिप्रतीकौ। रुद्रा- वेगिनौ। वर्तिः- सुमार्गेण। अश्ववत्- तुरगवत्। गोमत्- चिद्रश्मियुक्तम्। नृपाय्यम्- नृभिः पातव्यं सोमं रसं प्रति। सु- सुष्ठु। यातम्- आगच्छतम् ॥७॥

**न यत्परो नान्तर आदधर्षद्वृषण्वसू। दुःशंसो मर्त्यो रिपुः॥ २.०४१.०८**

वृषण्वसू- सम्पद्वर्षकौ। यत्- यद्धनम्। परः- दूरस्थम्। अन्तरः- अन्तिकस्थं वा। दुःशंसः- दुष्कीर्तिः। रिपुः- शत्रुः। मर्त्यः- नरः। न आदधर्षत्- यथा न बाधते तथा कुरुतम् ॥८॥

**ता न आ वोळ्हमश्विना रयिं पिशङ्गसंदृशम्। धिष्ण्या वरिवोविदम्॥ २.०४१.०९**

धिष्ण्या- हे धारणाकुशलौ। अश्विना- हे प्राणेशौ। ता- तादृशौ युवाम्। पिशङ्गसंदृशम्- नानारूपम्। वरिवोविदम्- श्रेष्ठलम्भकम्। रयिम्- दानयोग्यधनम्। नः- अस्मदर्थम्। आ वोळ्हम्- आवहतम् ॥९॥

**इन्द्रो अङ्ग महद्भयमभी षदप चुच्यवत्। स हि स्थिरो विचर्षणिः॥ २.०४१.१०**

इन्द्रः- परमेश्वरः। महत्- महतीम्। भयम्- भीतिम्। अभि सत्- अभिभवति। अप चुच्यवत्- अभिच्यावयेत्। सः- असौ। हि- खलु। विचर्षणिः- विशेषद्रष्टा ॥१०॥

Dr. Ranganji

WEBOLIM

**इन्द्रश्च मृळयाति नो न नः पश्चादघं नशत्। भद्रं भवाति नः पुरः॥ २.०४१.११**

इन्द्रः- परमेश्वरः। नः- अस्मान्। मृळयाति- आनन्दयति। पश्चात्- अनन्तरम्। नः- अस्मान्। अघम्- पापम्। न नशत्- न प्राप्नोति। नः- अस्माकम्। पुरः- प्रत्यक्षतः। भद्रम्- कल्याणम्। भवाति- भवति ॥११॥

**इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत्। जेता शत्रून्विचर्षणिः॥ २.०४१.१२**

शत्रून्- रिपूणाम्। जेता- जयशीलः। विचर्षणिः- विशेषद्रष्टा। इन्द्रः- परमेश्वरः। सर्वाभ्य आशाभ्यः- सर्वदिग्वर्तिभ्यः सर्वप्रजाभ्य इति भावः। सम्प्रदानार्थः। अभयम्- भयराहित्यं भयविरोधिधैर्यं वा। परि- परितः। करत्- करोतु ॥१२॥

**विश्वे देवास आ गत शृणुता म इमं हवम्। एदं बर्हिर्नि षीदत॥ २.०४१.१३**

विश्वे देवासः- सर्वे देवाः। आ गत- आगच्छत। मे- मम। इमम्- एतम्। हवम्- आह्वानम्। शृणुत। इदम्- एतत्। बर्हिः- दर्भासनं चित्तासनं वा। आ षीदत- उपविशत ॥१३॥

**तीव्रो वो मधुमाँ अयं शुनहोत्रेषु मत्सरः। एतं पिबत काम्यम्॥ २.०४१.१४**

अयम्- एषः। मत्सरः- तृप्तिकरः। तीव्रः- उद्गूर्णः। मधुमान्- मधुरो रसः। शुनहोत्रेषु- सुखकराह्वानयुक्तोपासकेषु। वः- युष्मदर्थं कल्पितः। एतम्- एनम्। काम्यम्- इष्टम्। पिबत- अनुभवत ॥१४॥

**इन्द्रज्येष्ठा मरुद्गणा देवासः पूषरातयः। विश्वे मम श्रुता हवम्॥ २.०४१.१५**

इन्द्रज्येष्ठाः- इन्द्रनाथाः। मरुद्गणाः- प्राणविशेषाः। देवासः- द्योतनशीलाः। पूषरातयः- पुष्टिधनाः। विश्वे- सर्वे। मम- मे। हवम्- आह्वानम्। श्रुत- शृणुत ॥१५॥

**अम्बितमे नदीतमे देवितमे सरस्वति।**

**अप्रशस्ता इव स्मसि प्रशस्तिमम्ब नस्कृधि॥ २.०४१.१६**

Dr. Rangaji
WEBOLIM

अम्बितमे- मातृश्रेष्ठे। नदीतमे- नदीश्रेष्ठे। देवितमे- देवताश्रेष्ठे। सरस्वति- रसचोदनाधिदेवते। अप्रशस्ताः- साधुप्रीतिरहिताः। इव। स्मसि- स्मः। अम्ब- मातः। प्रशस्तिम्- साधुप्रीणनाख्यसुकीर्तिम्। नः- अस्मभ्यम्। कृधि- कुरु ॥१६॥

**त्वे विश्वा सरस्वति श्रितायूंषि देव्याम्।**

**शुनहोत्रेषु मत्स्व प्रजां देवि दिदिड्ढि नः॥ २.०४१.१७**

त्वे- त्वयि। देव्याम्। सरस्वति- हे रसचोदनदेवते। विश्वा- सर्वाणि। आयूंषि- जीवनानि। श्रिता- श्रितानि। शुनहोत्रेषु- सुखाह्वानकारिषु। मत्स्व- तृप्ता भव। देवि। नः- अस्मभ्यम्। प्रजाम्- धर्मसन्ततिम्। दिदिड्ढि- देहि ॥१७॥

**इमा ब्रह्म सरस्वति जुषस्व वाजिनीवति।**

**या ते मन्म गृत्समदा ऋतावरि प्रिया देवेषु जुह्वति॥ २.०४१.१८**

सरस्वति- रसचोदनदेवते। वाजिनीवति- शोभनगतियुक्ते। ऋतावरि- प्रकृतिनियतियुक्ते। या- ये मन्त्राः। ते- तव। मन्म- मननीयाः। प्रिया- प्रियाः। देवेषु। गृत्समदाः- ज्ञानानन्दाः। जुह्वति- समर्पयन्ति। इमा- एतान्। ब्रह्मा- मन्त्रान्। जुषस्व- सेवस्व ॥१८॥

**प्रेतां यज्ञस्य शम्भुवा युवामिदा वृणीमहे। अग्निं च हव्यवाहनम्॥ २.०४१.१९**

यज्ञस्य- सङ्गतिकरणस्य देवपूजायाः दानस्य। शम्भुवा- मङ्गळेन। युवाम्। प्रेताम्- प्रगच्छताम्। हव्यवाहनम्- चरुपुरोडाशध्यानभावनादिहव्यवाहकम्। अग्निम्- पावकं क्रतुम्। च। आ वृणीमहे ॥१९॥

**द्यावा नः पृथिवी इमं सिध्रमद्य दिविस्पृशम्। यज्ञं देवेषु यच्छताम्॥ २.०४१.२०**

द्यावा पृथिवी- द्यावापृथिव्यौ। नः- अस्माकम्। सिध्रम्- स्वर्गसाधकम्। दिविस्पृशम्- हृदयाकाशस्पर्शिनम्। यज्ञम्। अद्य- इदानीम्। देवेषु। यच्छताम्- नियच्छताम् ॥२०॥

Dr. Rangaji
WEBOLIM

**आ वा॑मु॒पस्थ॑मद्रुहा दे॒वाः सी॑दन्तु य॒ज्ञिया॑ः।इ॒हाद्य सोम॑पीतये॥ २.०४१.२१**

वाम्- युवयोः। उपस्थम्- अन्तिके। अद्रुहाः- अद्रोहाः। यज्ञियाः- पूज्याः। देवाः। इह- अत्र।

अद्य- इदानीम्। सोमपीतये- रसानुभूतये। आ सीदन्तु- उपविशन्तु॥२१॥

Dr. Ranganji

WEBOLIM